**केन्द्रीय विद्यालय सङ्घटनम्, लखनऊ सम्भागः**
**सत्रान्त-परीक्षा (2023-24)**
**कक्षा- अष्टमी**
**विषयः- संस्कृतम्**

**समयः- सार्द्धहोराद्वय** **पूर्णांकाः- षष्टिः(60)**

---

**छात्र/छात्रा नाम-............................................... कक्षा & वर्गः-..............................**

**अनुक्रमांकः-................ दिनाँकः-........................... निरीक्षकस्य हस्ताक्षरम्-................**

**प्राप्तांकाः-( ) परीक्षकस्य हस्ताक्षरम्-...................**

---

**निर्देशाः-**

**1. निर्देशानुसारेण** सर्वाणि प्रश्नोत्तराणि प्रदत्त रिक्त स्थानेषु लेखितव्यानि।
2. प्रश्न पत्रे चत्वारः खण्डाः सन्ति।
क. अपठित अवबोधनम्- 10 अंकाः
ख. रचनात्मक लेखनम्- 10 अंकाः
ग. अनुप्रयुक्त व्याकरणम्- 15 अंकाः
घ. पठित अवबोधनम्- 25 अंकाः

---

## खण्डः - क ( अपठित-अवबोधनम् )

**प्रश्नः-1 निम्नगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-5**

भारतवर्षः कृषिप्रधान-देशः। अत्र अनेके जनाः ग्रामेषु निवसन्ति। कृषकाः कृषि-कार्यं कुर्वन्ति अन्नानि च उत्पादयन्ति। अन्नं विना कुतः जीवनम्? कृषिकार्यं विना च कथम् अन्नानाम् उत्पादनम् भवेत्? अतः ग्रामाणां कृषकाणां च महत्त्वम्। केचित् ग्रामीणाः स्वे-स्वे गृहे स्थित्वा कार्याणि कुर्वन्ति। यथा लौहकाराः लौहकार्यम् कुर्वन्ति, कुम्भकाराः घयन् रचयन्ति, तक्षकाः काष्ठेन मञ्चकान्, फलकान् आसन्दिकाः च रचयन्ति। अनेकेषु ग्रामेषु विद्युत्-सुविधा न अस्ति। जलानाम् अभावे कृषिः अपि इष्टम् फलं न ददाति। वस्तुतः ग्राम्य-जीवनम् अति कठिनम्। परम् ग्रामीणाः अल्पेन एवं सन्तुष्टाः भवन्ति।

**1. एकपदेन उत्तरत–** **1×2=2**

(क) भारतवर्षः कीदृशः देशः ?

.....................

(ख) के अन्नानि उत्पादयन्ति ?

......................

**2. पूर्णवाक्येन उत्तरत–** **2×1=2**

(क) तक्षकाः किं कुर्वन्ति ?

...................

https://www.evidyarthi.in/

**3. (भाषिककार्यम्)-निर्देशानुसारं उत्तरत- 1/2×2=1**

(क) 'जलानाम् अभावे कृषिः अपि इष्टं फलं न ददाति' इति वाक्ये कर्तृपदम् किम् ?

..............................

**(ख) 'भवन्ति' इति क्रियापदे का धातु:?**

**............................**

**प्रश्न:-2 अधःप्रदत्तं चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत- 1×5=5**



**1...........................................................................**

**2...........................................................................**

**3...........................................................................**

**4...........................................................................**

**5...........................................................................**

## खण्ड:- ख (रचनात्मक लेखनम्)

**प्रश्न:-3 मञ्जूषात: पदानि चित्वा कथां पूरमत-**
**1/2×10=5**

**(कश्चन, दूरे, नीचै:, यदा, तदा, यदि, तर्हि, परम्, च, सहसा)**

एकस्मिन् वने.....................व्याध: जालं विस्तीर्य..................स्थित:। क्रमशः आकाशात् सपरिवार: कपोतराज:...................... आगच्छत्। ....................कपोता: तण्डुलान् अपश्यन्................ तेषां लोभो जात:। परम् राजा सहमत: नासीत्। तस्य युक्ति: आसीत्................ वने कोऽपि मनुष्य:

https://www.evidyarthi.in/

नास्ति।...............कुतः तण्डुलान् सम्भवः। ............... राज्ञः उपदेशम् अस्वीकृत्य कपोतः तण्डुलान् खादितुं प्रवृत्तः जाले................. निपतिताः। अतः उक्तम्.................. विदधीत न क्रियाम्।

**प्रश्नः-4 अधोलिखितानि पदानि आधृत्य वाक्यानि रचयत-** **1×5=5**

**1.स्वकीयम्-..........................................।**

**2. सक्रिया-..................................................।**

**3. मुखरम्-...................................................।**

**4. परकीयम्-................................................।**

**5. विषमता-.................................................।**

**खण्डः-ग (अनुप्रयुक्त व्याकरणम्)**

**प्रश्नः-5 निर्देशानुसारं लकारपरिवर्तनं कुरुत -** **1×4=4**

**यथा- सा शिक्षिका अस्ति। (लङ्लकारः) सा शिक्षिका आसीत्।**

1. सा अध्यापने संलग्ना भवति । ( लृट् लकारे )

............................................

2. सः त्रयोदशवर्ष कल्पः अस्ति। ( लङ्लकारे )

..................................................

3. महिलाः तडागात् जलं नयन्ति। ( लोट् लकारे )

.................................................

4. वयं प्रतिदिनं पाठं पठामः। ( विधिलिङ्ग लकारे )

....................................................

**प्रश्नः-6 अधोलिखितपदानां सन्धिविच्छेदं/सन्धिः वा विकल्पेभ्यः चिनुत-** **1x4=4**

1) कालातिगमिनी = .......... + ...........

(क) कल +अतिगमिनि (ख) काल+ अतीगमिनि

(ग) काल+अतिगामीनि (घ) काल+अतिगामिनी

2) सूर्य + अचलः = .................

https://www.evidyarthi.in/

(क) सुर्यचल (ख) सूर्यचल:

(ग) सूर्याचलः (घ) सुर्याचल:

3) तथा + एव = ............ + ...........

(क) तथेव (ख) तथैव (ग) तथाव (घ) तथिव

4) वृक्षाग्रवासी = ............ + .............

(क) वृक्ष + अग्रवासी (ख) वृक्षः + अग्रवासी (ग) वृक्ष + आग्रवासी (घ) वृक्षा + आग्रवासी

**प्रश्नः-7 उचित मेलनं कुरुत-** **1/2×4=2**

| क. विशेष्य- पदानि | ख. विशेषण- पदानि |
| --- | --- |
| 1.अयम् | 1. संस्कृतिः.......................... |
| 2. संस्कृति विशिष्टायाम् | 2. इतिहासे................................. |
| 3. महत्वाधायिनी | 3. प्रदेशः............................... |
| 4. प्राचीने | 4. भारतभूमौ............................. |

**प्रश्नः- 8 उदाहरणमनुसृत्य तृतीया विभक्तिं प्रयुज्य रिक्त स्थानानि पूरयत-** **1×5=5**

क. ...................... सह पुत्रीं गच्छति। ( मातृ )

ख. .................. विना विद्या न लभ्यते। ( परिश्रम )

ग. छात्रः............ लिखति। ( लेखनी )

घ. सूरदासः .................अन्धः आसीत्। ( नेत्र )

ङ. सः .................साकं समयं यापयति। ( मित्र )

## खण्डः-घ (पठितावबोधनम्)

**प्रश्नः-9 निम्न संवादं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत- 1×4=4**

(ग्रीष्मर्तौ सायंकाले विद्युदभावे प्रचण्डोष्मणा पीडितः वैभवः गृहात् निष्क्रामति)

वैभवः – अरे परमिन्दर्! अपि त्वमपि विद्युदभावेन पीडितः बहिरागतः?

परमिन्दर् – आम् मित्र! एकतः प्रचण्डातपकालः अन्यतश्च विद्युदभावः परं बहिरागत्यापि पश्यामि यत् वायुवेगः तु सर्वथाऽवरुद्धः। सत्यमेवोक्तम् ।

प्राणिति पवनेन जगत् सकलं, सृष्टिर्निखिला चैतन्यमयी।

क्षणमपि न जीव्यतेऽनेन विना, सर्वातिशायिमूल्यः पवनः॥

https://www.evidyarthi.in/

विनय:- अरे मित्र! शरीरात् न केवलं स्वेद बिन्दव: अपितु स्वेदधारा: इव प्रस्रवन्ति।

1. वैभवः केन पीडितः गृहात् निष्क्रामति?

...........................

2. परमिन्दर् बहिः आगत्य किं पश्यति?

...........................

3. सकलं जगत् केन प्राणिति?

............................................

4. 'शरीरात्' इति पदे का विभक्ति:?

.............................................

**प्रश्न:-10 निम्न श्लोकं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत- 1×4=4**

यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम्।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि।।

1. कौ क्लेशं सहेते?

........................

2. कदा मातापितरौ क्लेशं सहेते?

........................

3. मातापित्रोः क्लेशस्य निष्कृतिः कैः अपि कर्तुं न शक्यते?

....................... ... ..

4. 'क्लेशम्' इति शब्दस्य क: अर्थ:?

..............................

**प्रश्न:-11 रेखांकित पदानि आधृत्य प्रश्न निर्माणं कुरुत- 1×5=5**

क. प्रसन्नताया: विषयोऽयम्।

https://www.evidyarthi.in/

............................

ख. सर्वकारस्य घोषणा अस्ति।

...........................

ग. अहम् स्वापराधं स्वीकरोमि।

...........................

घ. समयात् पूर्वम् आयासं करोषि।

............................

ङ. अम्बिका क्रोडे उपविशति।

............................

**प्रश्नः-12 समुचित कथनानां समक्षम् ' आम् ' तथा अनुचित कथनानां समक्षं ' न ' इति लिखत-**

**1×5=5**

क. निज निकेतनं गिरिशिखरे अस्ति। ...........

ख. स्वकीयं बलं बाधकं भवति। ...............

ग. पथि हिंस्राः पशवः न सन्ति। ...............

घ. गमनं सुकरम् अस्ति। ..................

ङ. सदैव अग्रे एव चलनीयम्। ...............

**प्रश्नः-13 भिन्नप्रकृतिकं पदं चिनुत- 1/2×4=2**

(1) गच्छति, पठति, धावति, अहसत्, क्रीडति। ...................

(2) छात्रः, सेवकः, शिक्षकः, लेखिका, क्रीडकः।..................

(3) पत्रम्, मित्रम्, पुष्पम्, आम्रः, फलम्।............................

(4) पृथिवी, वसुन्धरा, धरित्री, यानम्, वसुधा।......................

**प्रश्नः-14 अधोलिखित पदानां विपरीतार्थकपदानि लिखत- 1/2×6=3**

क. पुरतः-..........................

ख. अनुरक्तिः-.....................

ग. समादरः-.......................

https://www.evidyarthi.in/

घ.  भीतिः-.........................

ङ.  वरिष्ठा-........................

च.  प्रशंसितम्-..................

**प्रश्नः- 15 समानार्थकपदानि चित्वा लिखत-** **1/2x4=2**

1. पृथिव्याम् ............................ (क्षितौ/पर्वतेषु/त्रिलोक्याम्)

2. सुशोभते ............................ (लिखते/भाति/पिबति)

3. बुद्धिमताम् .......................... (पर्वणाम्/उत्सवानाम्/विपश्चिज्जनानाम्)

4. मयूराणाम् ............................ (शिखीनाम्/शुकानाम्/पिकाना्म्)

---

https://www.evidyarthi.in/